International Journal of Sanskrit Research 2024; 10(1): 249-251

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(1): 249-251
© 2024 IJSR
www.anantaajournal.com
Received: 24-12-2023
Accepted: 20-01-2024

**ए. के. पृथ्वीकृष्णाचलम्**
शोधच्छात्रा, संस्कृतविभागः
उस्मानिया-विश्वविद्यालयः,
हैदराबादनगम्, तेलंगाना, भारत

**Corresponding Author:**
**ए. के. पृथ्वीकृष्णाचलम्**
शोधच्छात्रा, संस्कृतविभागः
उस्मानिया-विश्वविद्यालयः,
हैदराबादनगम्, तेलंगाना, भारत

# रामायणे लौकिककलानां समालोचनम्

**ए. के. पृथ्वीकृष्णाचलम्**

## प्रस्तावना

संस्कृतभाषायाः लौकिकसाहित्ये सर्वप्रथमं महाकाव्यं रामायणम् ।अतएव “रामायणम्” आदिकाव्यम् इत्यपि अभिधीयते।काव्येऽस्मिन् मर्यादापुरुषोत्तमश्रीरामस्य चरितम्, आदिकविः महर्षिवाल्मीकिना अतीव मनोहररूपेण वर्णितम्।यस्य चरितम् भारतीयसंस्कृतौ आदर्शरूपाऽस्ति। अतएव आचार्य मम्मटेनोच्यते –

“रामादिवद्वर्तितव्यं न रावणादिवद्”[1] ।

भगवान् श्रीरामचन्द्रः समस्तकलाविशारदः । अतः अत्र रामायणे प्रायः समस्ताः अपि चतुष्षष्टिकलाः दृग्गोचराः भवन्तीति कथने न कोऽपि संशयः स्यादिति मन्ये। आधुनिकसमये अपि चतुःषष्टिकलानां सामाजिकजीवने अतीव उपयोगिता वर्त्तते। एताः कलाः लौकिकसाहित्ये प्रायः समस्तेष्वपि काव्येषु न्यूनाधिकरूपेण उपलभ्यन्ते।संस्कृतभाषायाः लौकिकसाहित्ये यानि काव्यानि मुख्यरूपेण विद्वज्जनानाम् आदर्शरूपाणि सन्ति, तेषु प्रमुखेषु काव्येषु महर्षिवाल्मीकिविरचितं रामायणम् आदिममिति कथने न कोऽप्याशङ्कते।

### 1. रामायणे “वाद्यम्” इति कलायाः समालोचनम्

“वाद्यम्” अस्य अर्थः अस्ति – विभिन्नवाद्ययन्त्राणां वादनस्य कला । सर्वप्रथमं वेदेषु अस्य उल्लेखः उपलभ्यते। तत्र दुन्दुभिः इति वाद्ययन्त्रस्य नामोल्लेखः विद्यते। युद्धक्षेत्रेषु ये योद्धारः युध्यन्ते स्म, तेषाम् उत्साहवर्धनाय अस्योपयोगः क्रियते स्म। यथोक्तम्-

“उच्चैर्घोषो दुन्दुभिः”…..|[2]

रामायणे दुन्दुभि-शङ्ख-मृदङ्गादीनाम् अनेकेषां वाद्ययन्त्राणामुल्लेखः प्राप्यते। अयोध्या नगरी मृदङ्ग-वीणा-पणवादीनां वाद्ययन्त्राणां ध्वनिना सर्वदा प्रतिध्वन्यते स्म।

“दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा। नादितां भृशम्”…. ॥[3]
इत्थमेव सीतारामयोः विवाहोत्सवे तूर्यादिवादनं सञ्जातम्। “तूर्योद्घुष्टनिनादिते” ॥[4]

रावणस्य प्रासादेष्वपि दिव्य-दुन्दुभीनां मधुरस्वरः प्रतिध्वन्यते स्म "दिव्यदुन्दुभिर्निह्रादां"[5]
किष्किन्धाकाण्डे तु सङ्गीतमाधुर्यस्य समष्टिरूपेण वर्णनं समुपलभ्यते । तत्रोच्यते –

"षद्वादतन्त्री मधुराभिधानं प्लवङ्गमोदीरितकण्ठ...... ॥"[6]

रामायणस्य सुन्दरकाण्डे वर्णितमस्ति यत् , यदा अञ्जनिपुत्रः हनुमान् लङ्कां प्रविशति तदा सः स्वोत्पातैः तत्रत्य शोभां दूषयति, येन कारणेन रावणस्य राक्षससेना तं निबध्नाति। तदनन्तरं हनुमतः पुच्छे अग्निं प्रदाय शङ्ख-भेरीणां नादेन तं (हनुमन्तं) सम्पूर्णे नगरे भ्रामयन्ति, येन जनेषु अपराधबोधः भवेदिति।"शङ्खभेरी निनादस्तं घोषयन्तः स्वकर्मभिः"[7]

## 2. रामायणे "धारणमातृका" इति कलायाः समालोचनम्

स्मृतिवृद्धेः साधनानां ज्ञानमेव धारणमातृका इति कला। अर्थात् प्राप्तज्ञानस्य स्मरणप्रक्रिया अपि एका कला एव। अत्र भूत-भविष्यत्-वर्त्तमानकालानां या व्यवस्था वर्त्तते, तस्यां व्यवस्थायां सः एव सार्थकः, यः स्वधारणाशक्तेः साधुरूपेण उपयोगं करोति। वेदमन्त्रेषु अपि अस्याः धारणाशक्तेः उल्लेखः वर्त्तते – "इयं ते धीतिः" (अथर्व. 11.01.11) अत्र "धीतिः" इति पदं धारणमातृकाकलायाः एव संसूचिका अस्ति।
रामायणे रामस्य विषये कथ्यते यत्, रामः वेद-वेदाङ्गानां मर्मज्ञः आसीदिति

"वेदवेदाङ्गतत्त्वज्ञः" (रा. बालकाण्डम्, 01.14)

श्रीरामः सर्वेषां शास्त्राणां तत्त्वैः अभिज्ञः आसीत्, इत्यनेन सिद्ध्यते यत्, रामस्य धारणाशक्तिः तीव्रतरा आसीत्। अन्यत्र च लङ्कायाः वर्णने कथ्यते, 'उषाकाले लङ्कायां हनुमता दृष्टं यत् साङ्गोपाङ्गवेदज्ञातृणां, वेदपाठी-राक्षसानां च मुखेन मन्त्रोच्चरणध्वनिः श्रुता।[3]

## 3. रामायणे "सम्पाठ्यम्" इति कलायाः समालोचनम्

सम्पाठ्यम् इति कलायाः अर्थः अस्ति यत्, योऽपि विषयः पठितः अथवा श्रुतः, तस्य विषयस्य तथैव पुनरावृत्तिः। प्राचीनकाले यदा पुस्तकानां मुद्रणकार्यं न जायते स्म, तदा श्रुतिपरम्परा एव आसीत्, गुरुशिष्ययोः मध्ये विद्यायाः आदान-प्रदानम् अनया एव परम्परया भवति स्म। एषा कला मुख्यरूपेण मन्त्रोच्चरणे, श्लोकानामावृत्तौ, गद्यपाठादि-सन्दर्भे उपयुज्यते स्म। पूर्वोक्त धारणमातृका कलया सह एषा कला अपि सम्बद्धा अस्ति। यतोहि धारणाशक्त्या एव सम्पाठ्यम् सम्यग्रूपेण कर्तुं शक्यते।
रामायणे अस्याः सम्पाठ्यकलायाः अत्युत्तमम् उदाहरणं हनुमतः कथने अस्ति, यदा हनुमान् लङ्कातः प्रत्यागच्छति स्म, तदा सः माता जानकीं कथयति यत्, तया (सीतया) यादृशः व्यवहारः हनुमता सह कृतः, श्रीरामाय च यः सन्देशः वक्तव्यः इति कथितः, तत्सर्वस्यापि आवृत्तिः श्रीरामः मम मुखात् यथातथं श्रोष्यति।

"श्रोष्यते चैव काकुत्स्थः सर्वं निरवशेषतः। चेष्टितं यत्त्वया देवि भाषितं मम चाग्रतः॥"[7]

तत्पश्चात् हनुमता स्वशपथं पूर्णमपि कृतवान्।
रामायणे बहूनि प्रकरणानि प्राप्यन्ते, यत्र बहवः सन्देशाः बहूनां कृते प्रेषिताः। श्रीरामोऽपि रावणस्य गुप्तचरान् शुकादीन् निम्नोक्त सन्देशं प्रेषितवान्, तथैव तान् सूचितवान् च, मम सन्देशं यथोक्तरूपेण रावणस्य सम्मुखे श्रावयतु इति।

"प्रविश्य नगरीं लङ्कां भवद्भ्यां ....... ॥"[8]

इत्थं एषा सम्पाठ्यकला रामायणे धारणमातृकाकलया सह अन्योन्याश्रितरूपेण बहुषु स्थानेषु उपलभ्यते।

## 4. रामायणे "मानसीकाव्यक्रिया" इति कलायाः समालोचनम्

मौखिकरूपेण लेखनी कर्गलं च विना या काव्यरचना क्रियते, सैव मानसीकाव्यक्रिया इति कला। अस्यां कलायां व्यक्तिः स्वमनसि चिन्तितं विषयं सौन्दर्यरूपेण शब्दैः अभिव्यक्ती करोति। प्राचीनकाले यदा लेखन्यादिकस्य अभावः आसीत्, तदा कवयः स्वीयकाव्यरचना अनया एव प्रक्रियया कुर्वन्ति स्म। वैदिकपरम्परा अपि अनया शैल्या एव प्रचलिता। अस्यां प्रक्रियायां अत्यधिकरूपेण मानसिकश्रमः अपेक्षितः। अत्र न केवलं पद्यस्य चर्चा क्रियते, गद्यस्य रचनाऽपि अनया शैल्या संभाव्यते।
रामायणे अस्याः कलायाः सङ्केताः नोपलभ्यन्ते, किं तु रामायणकर्तुः श्री महर्षि वाल्मीकस्य विषये वक्तुं शक्यते यत्, अस्य काव्यरचना शैली, उक्तकलया सम्बद्धा अस्ति। यतोहि रामायणस्य रचनासमये सर्वप्रथमं वाल्मीकिः मौखिकरूपेणैव श्लोकरचनाम् अकुर्वीत। इत्थं मौखिकरचनया युक्तमेतत् रामायणम्, अनया कलया युक्तोऽस्ति।

## 5. रामायणे "वैजयिकीविद्या" इति कलायाः समालोचनम्

युद्धेषु विजयप्रदाता विद्या, अर्थात् युद्धशास्त्रस्य अथवा अर्थशास्त्रस्य ज्ञानमेव वैजयिकीविद्या इति। संस्कृतसाहित्ये अस्याः कलायाः अनेकानि उदाहरणानि प्राप्यन्ते, येषु द्विविधः भेदः दरीदृश्यते। तत्र प्रथमे भेदे तु राज्यसम्बद्धाः येऽपि राजानः, अमात्याः, गुप्तचराः अथवा सैन्यबलं कथं भवेदिति। द्वितीये भेदे तु उपर्युक्तानां व्यावहारिकपक्षस्य विषये वर्ण्यते, अर्थात् रणक्षेत्रे युद्धस्य भीषणता, तेषु उपयुज्यमानानाम् अस्त्र-शस्त्राणां च उल्लेखः। अस्याः कलायाः उल्लेखः अपि सर्वप्रथमं वेदेषु एव उपलभ्यते। अथर्ववेदे उच्यते-

“यो नो द्वेषत्पृथिवि यः पृतन्याद् योऽभिदासान्मनसा यो वधेन।

तं नो भूमे रन्धय पूर्वकृत्वरि ॥“[9]

अर्थात् अत्र प्रार्थ्यते यत्, ”यः अस्मान् प्रति द्वेषभावनां स्थापयति, तस्यैव नाशः न भवतु, अपितु यः मनसि अपि अस्माकम् अहितं वाञ्छति, तस्यापि नाशः भवतु इति”।

अत्र शत्रोः पराभवस्य प्रार्थनायाः या परम्परा प्रचलिता, सा वैदिककालादेव विद्यते, इत्यत्र न कोऽपि संशयः स्यात्।

रामायणे अस्याः कलायाः प्राचुर्यं दृश्यते। यतोहि अस्मिन् काव्ये अनेकेषु स्थानेषु युद्धस्य वर्णनं प्राप्यते, यत्र युद्धस्य विषयं वर्णितमस्ति, तत्र सर्वत्रापि उपर्युक्तविधानेन अस्याः वैजयिकीविद्यायाः द्विविधः भेदः समुपलभ्यते। अत्र राज्याङ्गानां चयनविषये वर्ण्यते यत्, राजा अमात्यादयः कीदृशाः भवेयुः, तेषु के गुणाः भवेयुः इति, येन राज्यस्य अथवा राष्ट्रस्य उन्नतिः सम्यग्रूपेण भवेत्। तत्र अमात्यस्य विषये उच्यते यत् , अमात्यः कथं चेतव्यः इति-

“अमात्यानुपधातीतान् पितृपैतामहा........ ॥“[10]

रामायणे राज्ञः विषये उच्यते यत् , सः अष्टाङ्गबुद्धिसम्पन्नः, चतुर्धा बलसमन्वितः, राजनीतेः चतुर्दशगुणैः च युक्तः भवेत्।[11]

स्वशक्तेः विषये अत्यधिकः विश्वासः, शत्रुः बलशाली नास्तीति मन्यमानः च राजा युद्धे पराजयमनुभवति। यथा रावणस्य सेनापतिना प्रहस्तेन कथ्यते- ”सर्वे प्रमत्त विश्वस्ता वञ्चिताः स्म हनूमता । न हि मे जीवितो गच्छेज्जीवन्स वनगोचरः ॥“[12]

अर्थात् हनुमान् केवलं एकः तुच्छः वानरः अस्तीति मन्यमानः रावणः आसीत्, येन कारणेन स्वलङ्कायाः, सेनापतेः, अशोकवाटिकायाः च विनाशो सञ्जातः।

रावणः यदा-यदा सुमन्त्रणानाम् उपेक्षां कृतवान्, तदा-तदा तस्य युद्धे पराजयः अभूत्। यदा रावणः कुम्भकर्णं साहाय्यार्थं परिपृच्छमाणः आसीत्, तदा कुम्भकर्णः तस्य (रावणस्य) भर्त्सनां कुर्वन् कथयति –

“देशकालविहीनानां कर्माणि विपरीतवत् । क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥“[13]

अर्थात् यः देशकालपरिस्थितीनां विषये अविचारयन् कार्यं करोति, तस्य कार्याणि तथैव विपरीतफलदायकानि भवन्ति, यथा मन्त्ररहितहविषि प्रदत्ताः आहुतयः अनिष्टफलप्रदात्र्यः भवन्ति।

इत्थं सम्पूर्णे रामायणे युद्धसन्दर्भेषु अस्याः वैजयिकीविद्याकलायाः बहूनि उदाहरणानि प्राप्यन्ते, यैः वयं ज्ञातुं शक्नुमः यत्, एषा कला रामायणकाले कीदृग्रूपेण प्रचलने आसीत्।

इत्थं महर्षिवात्स्यायनप्रतिपादितासु चतुष्षष्टिकलासु रामायणे आकर्षक्रीडा, द्यूतविशेष, बालक्रीडनकम्. विचित्रशाकयूकभक्ष्यक्रिया, मेषकुक्कुटलावकयुद्धविधिः, शुकसारिकाप्रलापनम् इत्येवंविधाः कलाः परित्यज्य प्रायः सर्वासामपि कलानां वर्णनं प्राप्यते।

## सन्दर्भ सूची


1. का.प्र. 1.2 व्याख्या, पृ.10
2. अथर्व. 5.20
3. रा. बालकाण्डम्, 3.11
4. रा. बालकाण्डम्, 32.26
5. रा. अरण्यकाण्डम्, 32.10
6. रा. किष्किन्धाकाण्डम्, 22.12
7. रा. सुन्दरकाण्डम्, 35.9
8. रा. सुन्दरकाण्डम्, 10.02
9. रा. सुन्दरकाण्डम्, 25.06
10. रा. युद्धकाण्डम्, 18.17
11. अथर्व.12.01.14
12. रा. अयोध्याकाण्डम्, 70.16
13. रा. किष्किन्धाकाण्डम्, 36.02
14. रा. युद्धकाण्डम्, 06.05
15. रा. युद्धकाण्डम्, 36.06